पवन–पावन–चम्पूः

पंपातटीपरिसरे अकम्प-शम्पा-दीप्ति-विलुम्पक-शारीरिक-सुषुमा-संपदा ऱ्हपयन्तौ निलिम्पनायकान्, भुवस्तलमवतीर्णाविव कुमारसनत्कुमारौ, मानवीयकायकल्पमापन्नाविव अश्विनीकुमारौ, स्वकिरण-धरणीतल-विकिरण-परिणामं परीक्षमाणाविव पुष्पवन्तौ, स्वापत्यभूतागस्त्य वसिष्ठदर्शनार्थं मेदिनीतलमागताविव मित्रावरुणौ, मिथः कलहायमान-वालि-सुग्रीव-सौहार्द-संधान-साधनार्थं स्वयमागताविव सूर्यशक्रौ सौन्दर्यजितमारौ सुकुमारौ राजकुमारौ रामलक्ष्मणौ सीतां रक्षोनीतां निविडतरतरुस्तोमप्रततव्रततिततति – गहनातिगहनदण्डकगहनोपवनादिषु गब्हर-कन्दरि-कन्दराधित्यकोपत्यकादि विविधस्थलेषु विचिन्वन्तौ दूरादेव निरीक्ष्य संशयपिशाच्या शोशुच्यमानः चिन्ताग्निज्वाला-मालाभिरन्तरंगे पापच्यमानः भियोदग्रीवः सुग्रीवः मुहुर्मुहुस्तौ वलितग्रीवंमवलोक्य अधिकाधिकं कन्दलित सन्देह समास्कन्दितः स्वकार्यसाधनं सर्वलोकानन्दनं वायुनन्दनं धीमन्तं बलवन्तं श्रीमन्तं हनुमन्तमाकार्य वाचमूचे–

पश्य वानर कावेतौ कुतो वैताविवो बत
किं नरौ किंनरौ गूढौ वानरौ वाऽसुरौ सुरौ ।।
वालिना प्रेषितौ दुर्धीदूषितौ प्रणिधी नु नौ
शत्रू मित्र उदासीनौ विद्धि कौ किमिहागतौ

सकले नःकुले चिन्ता-व्याकुले विकले शुचा
हनुमानेक एव त्वं धीमान्नस्तारणे क्षमः ।।
सदागतीति नामैतद् गतिमात्रार्थकं न ते
ज्ञानार्थं तत्सदा तेन सर्वज्ञो हनुमांस्ततः ।।

Scanned by CamScanner

गच्छ पुच्छवतां श्रेष्ठ यतिवेषं प्रतीच्छ भोः
मा गच्छ कपिरूपेण तुच्छः स्या भर्च्छितः क्वचित् ।
वन्यामवन्यां सर्वस्यां मान्याः सन्यासिनो नृणाम्
शेमुषी-वेष-भाषा-श्री-सुषुमोन्मेष-सदंगुणैः ॥

मदनो नो विजानाति सदनं क्वास्ति ते त्विति
ब्रह्मचर्यमहार्यं किं नूनं नूनं (नु+ऊ) यते त्वयि ॥
शर्व-पूर्वाः सुपर्वाणः सर्वे-स्वर्वासिनोऽपि च
मानयंत्यानमंन्त्येतान् किं पुनः पामरा नराः ॥

वाली किं युक्तिशाली तौ प्रहिणोति क्षिणोति माम्
संदंदहीति संदेहः स्वं देहं तमपाकुरु ॥

एवमंकुरित-संशीतिना समुपजनितभीतिना कपि-कुल-केतुना सुग्रीवेण समादिष्टः वानरश्रेष्टः मारुतिः स्पृहणीयं अर्हणीयं नमनीयं कमनीयं च यतिवेषमास्थाय चक्षुषोर्लक्ष्यतामयासीद्रामलक्ष्मणयोः । तं च तरुण-तरणि-संकाशं विष्वग्विसारि-काय-कान्ति-प्रकाशं अरुणारुण काषायांशुकधारिणं अवलोकक-लोक-लोचन-मनोहारिणं स्वाधीनसर्वेन्द्रियग्रामं किंकरीभूतकामं तर्जितकोपं वर्जितशापं दूरीकृतमोहं ऊरीकृत-सज्जनस्नेहं विशाललललाटफलकं समुल्लसत्तिलकं मर्दितमदं वर्धितदमं शारदापतिमिवं चतुराननाश्रितचतुर्वेदं सत्यलोकाश्रयं च, चन्द्रचूडमिव वृषध्वजं आर्यानुरागिणं च, वासवमिव सुधर्माधिष्ठितं विबुधप्रियं च, वैश्वानरमिव मरुत्सखं पावकं च' आदित्यमिव त्रयीतनुं प्रकाशप्रदं च सुधाकरमिव गिरीशशिरोलालितं द्विजराजाभिगीतं च, दमधामानं शमसीमानं विरक्तिरक्षेमानं, भाग्यमिव वैराग्यस्य, क्षमाकल्पं क्षमया प्रासादमिव प्रसादस्य पण्यक्षितिमिव दाक्षिण्यस्य, केन्द्रमिव दैविकशक्तेः खनीमिव गुणमणीनांनिर्गमनमार्गं दयास्रोतसः, क्षालयन्तमिव त्रिलोकीं करुणाजलेन पावयन्तमिव दशदिशः दृष्टिपातेन उद्धरन्तमिव धरणीतलं

चरण-विन्यासेन, प्रवाहयन्तमिव पुण्यधारां दिक्षुविदिक्षु, उद्दीपयन्त मिव अध्यात्मज्योतिः मर्त्यलोके, पवित्रीकुर्वन्तमिव वेदराशिं उच्चारणेन मर्दयन्तमिव कलिं सरभसपादक्षेपेन, मृत्नन्तमिव अधर्मं, मूर्तिमिव सौज-, न्यस्य, कीर्तिमिव हरिभक्तेः, पूर्तिमिव भगवत्कार्यस्य, कम्ररूपमिव नम्रतायाः, आहोपुरुषिकामिव सनातनधर्मस्य, प्रतिष्ठामिव भगवन्नि-ष्ठायाः, ब्रह्मवर्चस्विनं तपनतेजस्विनं हुताशनौजस्विनं महामनस्विनं समीपमागत्य पादोपान्तमुपेत्य साष्टांगं प्रणिपत्य स्वं अंघ्रिद्वंद्वं भक्ति भावोद्रिक्तानंदाश्रुभिरभिषिंचन्तं हनुमन्तं स्नेहभाव-निर्भराभ्यां दोर्भ्यां मुत्थाप्य सरभसमालिंग्य वक्षसा, रक्षोविघातदक्षः दाशरथिः श्लक्ष्णया अभ्यभाषत क्षरत्सुधारसया सरसया वाचा सर्वज्ञोऽप्यज्ञ इव लोक विडम्बनार्थम् ।

यते त्वं मा यतेरस्मत्प्रणतेर्हि कृते यतः
नतिस्सा नः क्षतिं कुर्यादायुषो गृहिणां कृता ॥
काषायवस्त्र-मात्रेण यतिः पूज्य इति स्मृतिः ।
यतीनां नम्यतामुक्त्वा नन्तृतां च निषेधति

हरिं विनाऽन्तरा वायुं त्यक्त्वा गुरुपरम्पराम्
कर्मन्दी नैव वन्देत नो चेद्विन्देत पातकम् ।
तरुणश्च तपस्वी च को भवान् दिव्य दीप्तिमान्
तुर्याश्रमश्रमः किं वा यौवनेऽगीकृतस्त्वया ?

किमर्थं मामुपैषि त्वं पुमर्थं यदि वांछसि
समर्थोऽहं प्रदातुं तत्स्वमर्थं ब्रूहिमत्पुरः ।

Scanned by CamScanner

श्रीरामस्य वचः श्रुत्वा हनुमान् वाक्यमब्रवीत् ।

क्षम्यतामिदमागो महाभागेन निगमागमाभिगीतेन अविगीतेन अगणितगुणगणमणिमालिना करुणाशालिना अत्रभवता भवता सर्वमपि विदितवता

"एकदण्डी त्रिदण्डी वा नास्मि मुण्डी महाप्रभो ॥
अहं परमहंसोऽपि हंसमन्त्रं जपामि ते ।

सुग्रीवस्याग्रहान्नाहं प्रकटो मर्कटात्मना
उपस्कुर्वन्मस्करित्वं नमस्कर्तुमुपस्थितः ॥
क (कःब्रह्म) स्त्वमीशोऽसि नः श्रीश तस्मात्कीशोऽस्मि केशव
दासतां कीशकाशस्य दिश नोदासतां कुरु ॥

चरणं शरणं तेऽस्तु करुणाभरणं मम
त्वत्पूजाचरणं शश्वत्त्वन्नामोच्चरणं भवेत् ॥
सुग्रीवो नाम राजा नः कपीनां वनवासिनाम् ।
त्वन्मन्त्रपठनान्मुख्यमन्त्री तद्गुणमन्त्र्यहम् ॥

ज्यायान् जायामपाहृत्य रुमां वाली मनोरमाम्
रमते तस्य रामां त्वं पत्या संयोजय प्रभो ॥
स तु वामाललामां ते सीतां नीतां च रक्षसा
प्रत्याहर्तुं कृते यत्ने साहाय्यं च करिष्यति ॥

प्रभोस्सर्वसमर्थस्य कपयः किं सहायकाः
स्वोद्धाराय सहाऽयान्ति त्वयैतेषु दयां कुरु ॥

पवन-पावन-चम्पूः

आंजनेयस्तवनांजलिः

वातापत्यमहं नमामि सुमनोव्रातादिदैवं परं
नीतो येन हि कुल्यतां जलनिधिस्सीता च सन्तोषिता ॥
दूतोऽस्मीति हरेरहं रिपुसदस्युद्घोषयन् भीषयन्
प्रीतो मेऽस्तु सदा प्रभंजन इति ख्यातोंऽजनायाः सुतः ॥ १ ॥

नमोवाकं ब्रूमो हृदि तत-तमोऽज्ञान-विभिदे
समो येन स्यान्नो दिवि भुवि तथा ज्ञान-बलयोः ॥
क्षमाऽक्षाम-क्षेम-क्षम-महिम-भूमोदयवते
क्षमा-सीम्ने धाम्ने गुरु-पवन-नाम्ने शुभकृते ॥ ॥ २ ॥

अंसारोपित रामलक्ष्मणरघूत्तंसाय दूरक्षसां
हिंसाकार्यसमुद्यताय कृतसद्रामप्रशंसाय च ॥
हंसाख्यस्य मनोर्जयं हृदि सदा पुंसां मुदा तन्वते
संसाराम्बुधिसेतवेऽस्तु मरुते श्रीहेतवे मे नतिः ॥ ॥ ३ ॥

पारावारमपारघोरमपि यो धृत्योत्ततारा‌ऽश्रमं
विन्ध्याद्द्युन्नतगन्धमादनगिरिं यश्चोद्बभार क्षणात् ।
श्रीरामांगुलि-जानकी-प्रिय-मणी शीर्ष्णोद्दधारादरात्
सोऽयं गन्धवहस्य नन्दनकपिः स्यान्मे मनोनन्दनः ॥ ॥ ४ ॥

त्राता संकट-कोटितो भगवतो ध्याता हरेः सर्वदा
नेता राम-वचो-मणेर्जनकजां दैत्योक्ति-भीतां प्रति ॥
स्तोता रामविभोस्तदीयमहिमोद्गाता मृत-प्राणसं-
दाता वायुसुतोऽनिलोऽस्तु दुरित-व्रातोपघाताय नः ॥ ॥ ५ ॥

Scanned by CamScanner

कर्ताश्चर्यततेः सतामपि समुद्धर्ता च रामात्मनां
संहर्ताऽक्षकुमारकस्य च तथाऽहर्ता गिरेः पाणिना ॥
भर्ता देवगणस्य रामवचसां बुद्ध्याऽनुसर्ताबुधेः
तर्ताऽसौ भवसागराद् भवतु मे कीशावतारोऽनिलः ॥ ॥ ६ ॥

रामांघ्रचर्चन-नित्य-सक्त-हृदयो रामातिदूरोऽपि सन्
निर्दोषात्म-निरंजनोऽपि च सदा यो वांऽजना-रंजनः ॥
हन्ता पुण्यजनस्य चानिशपरित्राता च तस्यैव हि
सोऽयं चित्र-विचित्र-चारु-चरितः श्रीमारुतिः श्रेयसे ॥ ७ ॥

व्रात्याग्रेसर-लोकहिंसक-महादैत्याधमानां बलाद्
हत्यां यो विदधे हि सापि च हरेः पूजेति-मत्या मरुत् ॥
कृत्यान्यात्मकृतानि चेशपदयोर्भक्त्या च योऽवार्पयत् ।
दौत्यं चोत्तम-कृत्यमीशितुरिति प्रेम्णाऽचरन्मे मुदे ॥ ॥ ८ ॥

लंकां योऽवनिमंडलस्य हि शिरोऽलंकारभूतां महा-
हंकारावृत-रावणादि-कुकलंक्यावासतः पंकिलाम्
कृत्वा स्वच्छ-सुपुच्छ-कच्छदहन-ज्वालोर्मि-संशोधितां
रामांघ्रचर्पण.पुण्य-योग्य-नगरीं तन्वन् हनूमान् मुदे ॥ ॥ ९ ॥

रामैकान्तिक-भक्त-भृत्य-परिवारान्तः प्रवेश्यो न वा
शत्रोर्बन्धु-विभीषणस्त्विति विचारे वर्जितस्तर्जितः ।
सुग्रीवांगद-लक्ष्मणादिभिरसौ ग्राह्योऽप्यनुग्राह्य इ-
त्यभ्यर्थ्याऽसुरमैशकोटिघटितं चक्रे मुदे यः कपिः ॥ ॥ १० ॥

Scanned by CamScanner